शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञान शाकुन्तलम् नाम नाटकस्य
श्लोके सूक्ति भागस्य व्याख्या।

'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' 1/20॥

श्लोकांशोऽयं कविता वनिता हास्य माननेन सर्वथा प्रसिद्धेन रससिद्धेन, कवीश्वरेण, संस्कृत साहित्यमहोदधि पूरणाय जलदायमानेन, काव्यकला निपुणेन महाकविना कालिदासेन विरचितस्य संस्कृत साहित्य ललामभूतस्य, निखिल नाट्यतत्वपूरकस्य 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इति ख्यातस्य सर्वथा नवनवस्य अभिज्ञान शकुन्तलनामधेयस्य नाटकस्य प्रथमाङ्कादुद्धृतोऽस्ति।

अत्र धृत वल्कलां शकुन्तलां दर्शं दर्शं राजा दुष्यन्तु शकुन्तलाशरीरे वल्कलं निन्दति पुनश्च चिन्तयति यद् वल्कलेनापि अस्याः शरीरस्य सौन्दर्यमपचीयते न तु क्षीयते इति —

हि = यतः मधुराणां = दर्शनीयानां 'मधुरः प्रियदर्शनः' इति दशरूपकवचनात् सुन्दराणामिति यावत् आकृतीनां = स्वरूपाणां किम् = किं वस्तु इवेति सम्भावनायाम्, मण्डनम् = अलङ्करणं सौन्दर्योत्कर्षकं न = नहि भवतीति अर्थात् मधुराणां आकृतीनां कृते सर्वमपि मण्डनं जायते इति

अतः मधुरायाः शकुन्तलायाः वल्कलेनापि शोभा जायते एवेति।

श्लोके प्रतिवस्तूपमालङ्कारेण सह अर्थान्तरन्यासालङ्कारस्य उपस्थितिः सन् ~~सिद्धह~~ सूक्तिरलङ्कारस्य माध्यमेन कविना स्वमनोभावं व्यनक्ति।

ननमयययुतेयं मालिनी भोगिलोकैः इति लक्षणेन 'मालिनी वृत्तञ्च दृश्यतेति।

उपेन्द्र झा
12/10/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
बुरबेना, पूर्णियाँ

Oct 12, 2020

शास्त्री द्वितीय खण्डस्य कृते (साहित्य दर्पण:)
षष्ठ: परिच्छेद: नाट्योक्तीनां परिचय: ।

---

स्वगतम् – "अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।"
अर्थात् यद् वाक्यम् अन्यस्य श्रवणयोग्यं नहि
दृश्यकाव्ये स्वस्मिन् आत्मनि गतं = प्रत्यक्षत्वेन
स्थितमिति स्वगतं मतम् । अर्थात् तद्वाक्यं पात्रोऽन्यं
न वदति किन्तु स्वमनस्येव इत्थं वदति येन सामा-
जिका: तच्छृण्वन्ति । 'आत्मगतम्' इत्यस्यैव नामा-
न्तरम् अस्ति स्वगतम् ।
यथा स्वप्नवासवदत्ते – 'वासवदत्ता – (आत्मगतम्) एदं
पि मए कत्तव्वं आसी । अहो अकरुणा खु
इस्सरा ।'

प्रकाशम् – 'सर्वश्राव्यं प्रकाशं स्यात् ।' इति
यद् वस्तु सर्वै: श्रवणयोग्यं तत् सर्वेषु प्रकाशते
प्रत्यक्षीभवतीति 'प्रकाशम्' कथ्यते ।
यथा स्वप्नवासवदत्ते – 'वासवदत्ता – हला ! किं
दिट्ठो जामादुओ ?' इति

अपवारितम् – तद्भवेदपवारितम् । रहस्यं यदन्यस्य
परावृत्य प्रकाश्यते ।' इति ।
यद् गोपनीयं वस्तु एकस्मात्
पात्रात् सङ्गोप्य स्थानान्तरं गत्वा परस्प
रमस्य समक्षे प्रतिपाद्यते तद् अपवारितम्
इत्युच्यते ।
यथा – स्वप्नवासवदत्ते – 'राजा – अये पद्मावती
(अपवार्य) वसन्तक ! किमिदम् ।

क्रमश:

उपेन्द्र झा
12/10/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
सुरवेतना(?), पूर्णियाँ(?)

Oct 12, 2020

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

अलङ्कार विवेचनम्

अपह्नुतिः अतिशयोक्त्योः अलङ्कारयोः विवेचनम् ।

अपह्नुतिः :- उपमेयस्य प्रतिषेधं कृत्वा उपमानस्य आरोपकरणम् अपह्नुतिरलङ्कारः । उक्तञ्च साहित्यदर्पणे —

'प्रकृतं प्रतिषिध्यान्य स्थापनं स्यादपह्नुतिः' इति

उदाहरणं यथा —

'नेदं नभोमण्डलमम्बुराशि नैताश्च तारा नवफेनभङ्गाः ।
नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः ॥'

प्रतिषेध पूर्वक अत्र नभोमण्डलादि उपमेय स्थापनाद् 'अम्बुराशि' आदि उपमानस्य अपह्नुतिरलङ्कारः ।

अतिशयोक्तिः :- 'सिद्धत्वेऽध्यवसायस्यातिशयोक्तिः निगद्यते ।'

उपमेयस्य निगरण पुरःसरम् उपमानेन सह तस्याभेदज्ञानम् अध्यवसायः । निगरणमत्र अधःकरणमेव । उक्तञ्च —

'विषयस्यानुपादानेऽप्युपादानेऽपि सूरयः ।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते ॥' इति

एवम्भूतस्य अध्यवसायस्य सिद्धत्वेसति अतिशयोक्तिरलङ्कारः । उत्प्रेक्षायाम् उपमेयस्य अनिश्चित रूपेण निर्देशात् तत्राध्यवसायस्य साध्यत्वं भवति । इह तु तस्य निश्चित रूपेण निर्देशाद् अध्यवसायस्य सिद्धत्वम् इति अतिशयोक्तिरलङ्कारस्य उदाहरणम् ।

उपेन्द्र झा

12/10/20

व्या० प्रा० साहित्य

रा० उ० वि० महावि०

पुरुसेना, ऊर्धियां

Oct 12, 2020